# ।। व्याकरणदर्शने प्रमाणमीमांसा ।।

**एसो. प्रो. भगवत् शरणशुक्लः**
**व्याकरणविभागः**
**संस्कृतविद्याधर्मविज्ञानसङ्कायः**
**काशीहिन्दूविश्वविद्यालयः, वाराणसी**

अखिलेऽप्यस्मिन् जगति यत्किञ्चिदपि साक्षात् क्रियते ज्ञायते, तत् सर्वं प्रमेयपदेन ग्रहीतुं शक्यते । प्रमेयज्ञानञ्च न स्वभावतो भवितुमर्हति किमप्यसाधारणं कारणं विनेति सिद्धन्तस्यास्य सत्त्वादत्र प्रमेयज्ञाने करणत्वेन प्रमाणमङ्गीकुर्वन्ति समेऽपि दार्शनिकाः । तद्वति तत्प्रकारकोऽनुभवः प्रमा, प्रमितिकरणं च प्रमाणमिति नैयायिकप्रभृतिदार्शनिकाः स्वीकुर्वन्ति ।[१] शाब्दिकशिरोमणयो महाभाष्यकारास्तु ''उपमानानि सामान्यवचनैः''इति सूत्रे अनिर्ज्ञातार्थविशेष्यकं सामान्यविशेषधर्मादि-रूपसकलसम्भावितधर्मप्रकारकं ज्ञानं प्रमा तत्करणं प्रमाणमिति प्रमाणसामान्यलक्षणमङ्गीकुर्वन्ति । तथा च भाष्यम् ''मानं हि नाम अनिर्ज्ञातज्ञानार्थमुपादीयते, अनिर्ज्ञातमर्थं ज्ञास्यामि इति । तत् समीपे यन्न अत्यन्ताय मिमीते तदुपमानम्'' इति ।[२] अत्र प्रदीपकारः - ''यथा प्रस्थादि । तेन हि साकल्येन मेयं परिच्छिद्यते - इत्याद्याह ।''[३] उद्योतकारश्चात्र अनिर्ज्ञातस्य साकल्येन ज्ञापकत्वं हि तत्त्वम् । यथा प्रस्थाद्यज्ञातस्य परिमाणरूपार्थस्य साकल्येन ज्ञापकं न तथोपमानम् ''[४] इत्याह। स्थलेऽस्मिन् कैयटः प्रमाणसामान्यलक्षणस्योपमानेऽसत्त्वात् नोपमानं प्रमाणमित्यपि प्रतिपादितवान्।''[५] इतिवार्त्तिकेन साकल्येनेत्यत्र सकलशब्दात् स्वार्थे ण्यत्प्रत्ययो विद्यते । तृतीयार्थश्च प्रकारत्वम् । ''प्रकृत्यादिभ्यय उपसंख्यानम्''[६]

---

१. तर्कसंग्रह प्रत्यक्षखण्डे ।

२. म. भा., २/१/५५.

३. म. भा. प्र. उ., २/१/५५.

४. म. भा. प्र. उ., २/१/५५.

५. गुणवचनब्राः, ५/१/१२४ इति सूत्रे ।

६. कर्तृकरणयोः, २/३/१८ इति सूत्रे भाष्ये ।

इति वार्त्तिकेनात्र साकल्येनेति पदे तृतीयाविभक्तिर्भवति । अनिर्ज्ञातार्थस्य इत्यत्र षष्ठ्यर्थो विशेष्यत्वम् । तेन अनिर्ज्ञातार्थविशेष्यकं सामान्यविशेषधर्मादिरूपकलसम्भावितधर्मप्रकारकं ज्ञानं प्रमा तत्करणं च प्रमाणमिति पूर्वोक्तलक्षणं सिध्यति । तस्मात् सामान्यविशेषधर्मादिरूपसकल-सम्भावितधर्मावच्छिन्नप्रकारतानिरूपितानिज्ञातार्थनिष्ठविशेष्यताकज्ञानकरणत्वं प्रमाणत्वमिति प्रमाणसामान्यलक्षणं पर्यवस्यति । भाष्यस्थं 'साकल्येन' इति पदमबाधितार्थविषयकत्वं गमयति, तस्यैवार्थो सामान्यविशेषधर्म इति । सामान्यधर्ममात्रग्रहणे विपर्ययः संशयो वा सम्भवेत्, विशेषधर्मग्रहणेतु तद्बाधः । सामान्यज्ञानपूर्विकैव विशेषजिज्ञासा भवतीति विषयेऽस्मिन् नागेशः पस्पशाह्निके ''विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वादित्यन्ये'' इत्युक्तवान् ।[१] वाक्यपदीयकारोऽप्येवमेव प्रमाणलक्षणं निर्दिशति-

**''अनिर्ज्ञातस्य विज्ञानं येन तन्मानमुच्यते ।**
**प्रस्थादिकेन मेयात्मा साकल्येनाभिधीयते ।।**
**अनिर्ज्ञातं प्रसिद्धेन येन तद्धर्म गम्यते ।**
**साकल्येनापरिज्ञानादुपमानं तदुच्यते ।।''**[२]

अत्र भर्तृहरिः महाभाष्यसम्मतं प्रमाणलक्षणमङ्गीकृत्योपमानं प्रमाणत्वेन नाङ्गीचकार । अन्ये दार्शनिका अपि प्रमाणस्य लक्षणं निरूपयन्ति । तत्र सांख्याः असान्दिग्धाविपरीतानधिगतविषयकचित्तवृत्तिः प्रमा तत्साधनं प्रमाणमितिप्रमाणलक्षणं कथयन्ति।[३]

''अनिधगततत्त्वबोधपौरूषेयो व्यवहारहेतुः प्रमा तत्करणं प्रमाणमिति ''योगाचार्याः प्रमाणलक्षणमङ्गीकुर्वन्ति ।[४] ''तच्च प्रमितिकरणं प्रमाणम् । तत्प्रकारकं ज्ञानं प्रमितिः'' इत्याह केशवमिश्रः।[५]एवमेव कणादः ''अदुष्टंविद्या'' इत्यत्र करणोत्कर्षेण प्रमोत्कर्षं ज्ञापयति । करणे इन्द्रियादौ दोषाभावः प्राशस्त्यम्, तादृशकरणजन्या प्रमा । अत्रापि अबाधितार्थानुभवरूपा प्रमा तिष्ठति । तत्करणं च प्रमाणमिति लक्षणमायाति ।[१]

---

१. म. भा. पस्पशाः गौरित्यत्रकः शब्द इति भाष्ये ।

२. वा.प., ३/१४/३५९-६०.

३. साख्यतः कौ. कारिका ४.

४. तत्त्ववैशारदी टीका, १/१/१७.

५. न्यायसूत्रप्रकाशवृत्तिः, १/१/१३.

मीमांसकेषु कुमारिलभट्टः ‘‘अदुष्टकरणजन्यमनुपलब्धाबाधितार्थविषयकं ज्ञानं प्रमा’’, तत्करणं प्रमाणमिति-

**‘‘औत्पत्तिकगिरा दोषः कारणस्य निवार्यते ।**
**अबाधो व्यातिरेकेण स्वतस्तेन प्रमाणता ।।**
**सर्वस्यानुपलब्धेऽर्थे प्रामाण्यं स्मृतिरन्यथा ।।’’[२]**
**इति श्लोकवार्तिके प्रमाणितवान् ।**

वेदान्तिनस्तावत् ‘‘अनधिगताबाधितार्थकविषयकं ज्ञानं प्रमा, तत्करणं प्रमाणमिति’’ वेदान्तिपरिभाषाग्रन्थे कथितवन्तः ।[३]

जैनाचार्यः श्रीमानकलङ्कः ‘‘अविसंवाद्यनधिगतार्थविषयकं ज्ञानं प्रमा, तत्करणं प्रमाणम्’’ इति प्रमाणपदार्थमाह।[४] तत्र अविसंवादित्वं नाम विसंवादिप्रवृत्तिजनकत्वाभावरूपमस्ति ।

प्रमाणवार्तिके बौद्धाचार्यो धर्मकीर्तिश्च ‘‘प्रमाणमविसंवादिज्ञानार्थक्रियास्थितिः, अविसंवादनं शाब्दाऽप्यभिप्रायनिवेदनात्’’ इत्येवं प्रतिपादितवान् ।[५]

इत्थं समेषामपि दार्शनिकानां प्रमाणलक्षणे यथाकथञ्चित् साम्यं दृश्यते । वैयाकरणप्रतिपादितप्रमाणधटकप्रमालक्षणेऽनिर्ज्ञातार्थविषयकमिति विशेषणस्य ‘धचोऽय घटोऽयम्’ इत्येकाकारमविच्छिन्नं जायमानं यत् प्रत्यक्षात्मकं ज्ञानं धारावाहिकमित्युच्यते तत्र द्वितीय तृतीयचतुर्थादिक्षणेषु निर्ज्ञातविषयत्वमेव तज्ज्ञाने सत्त्वेनाभावात् कथं तत्र प्रमात्वं सिध्येदिति जिज्ञासायामुच्यते, यत् धारावाहिके ज्ञाने एका स्थिरा वृत्तिर्भवति । तेजोरूपस्य चक्षुरिन्द्रियस्य च प्रतिक्षणं भिन्नस्य,चोत्पादेन तत्रानिर्ज्ञातार्थेति विशेषणस्य सत्त्वादव्याप्तिदोषो न भवति ।

परमशाब्दिको भर्तृहरिर्वाक्यपदीयब्रह्मकीण्डेऽनेकानि प्रमाणानि उपस्थापितवान्-

---

१. वैशेषिकभाष्य, ९/२/१२.

२. श्लोकवाः औत्पत्तिक श्लोक १०-११.

३. वे. प. प्रमाण परि, पृ.१६.

४. अष्टाध्यायी, पृ.१७५.

५. प्रमाणवार्तिक, २/१.

**''यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।**

**अभियुक्ततरैरन्यैरन्यथैवोपपद्यते ।।**

**परेषामसमाख्येयमभ्यासादेव जायते ।**

**मणिरूप्यदिविज्ञानं तद्विदां नानुमानिकम् ।।**

**प्रत्यक्षमनुमानं च व्यतिक्रम्य व्यवस्थिताः ।**

**पितृरक्षःपिशाचानां कर्मजा एव ुसद्धयः ।।**

**आविर्भूतप्रकाशानामनुपप्लुतचेतसाम् ।**

**अतीतानागतज्ञानं प्रत्यक्षान्न विशिष्यते ।।**

**अतीन्द्रियानसंवेद्यान् पश्यन्त्यार्षेण चक्षुषा ।**

**ये भावान् वचनं तेषां नानुमानेन बाध्यते ।।**

**चैतन्यमिव यश्चायमविच्छेदेन वर्तते ।**

**आगमस्तमुपासीनो हेतुवादैर्न बाध्यते ।।''**[१]

एताभिः कारिकाभिः प्रत्यक्षम्, अनुमानम्, शब्दः, अभ्यासः, योगिनां, पितृरक्षः पिशाचादीनां विशिष्टसिद्धिरूपमदृष्टम् इत्येतानि प्रमाणानि सिध्यन्ति । एतेषां प्रमाणानां परीक्षणं पूर्वोक्तप्रमाणलक्षणानुसारेण क्रमशो विधीयते ।

(१) प्रत्यक्षम्-प्रत्यक्षप्रमाणलक्षणविषये नैयायिकप्रभृतयो दार्शनिकाः इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रमा, तत्करणं प्रत्यक्षप्रमाणमथवा शाब्दिकमते च इन्द्रियार्थसन्निकर्षजन्या या बुद्धिवृत्तिः सा तत् प्रतिबिम्बितं चैतन्यं वा प्रत्यक्षप्रमा तत्करणं प्रत्यक्षप्रमाणमिति लक्षणं भवति ।

---

१ वा. प. ब्र. का. ३४-३८,४० कारिका

ज्ञानाकरणकं ज्ञानं प्रत्यक्षं तत्करणं प्रत्यक्षम् । यथा अनुमितौ व्याप्तिज्ञानम् उपमितौ सादृश्यज्ञानं शाब्दबोधे पदज्ञानं कारणं भवति, तथा प्रत्यक्षे न किमपि ज्ञानं कारणं भवति अपितु इन्द्रियार्थसन्निकर्ष एव कारणं भवति । नैयायिकमते सन्निकर्षश्चायं षड्विधः संयोगः संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेष्यविशेषणभावश्च ।[१] यथा घटप्रत्यक्षे संयोगः सन्निकर्षः, घटरूपप्रत्यक्षे घटे रूपस्य समवायेन सत्त्वात् संयुक्तसमवायसन्निकर्षः, घटरूपस्थरूपत्वधर्मप्रत्यक्षे रूपे रूपत्वधर्मस्य समवायेन सत्त्वात् संयुक्तसमवेतसमवायसन्निकर्षः, शब्दप्रत्यक्षे समवायसन्निकर्षः, शब्दस्य आकाशे समवायसम्बन्धेन सत्त्वात् । तत्रैव शब्दत्वप्रत्यक्षे समवेतसमवायसन्निकर्षः, । भूतले धटाद्यभावप्रत्यक्षे च भूतलानुयोगिकघट-प्रतियोगिकत्वविशिष्टाभावरूपः विशेष्यविशेषणभावसन्निकर्ष आश्रीयते ।

प्रत्यक्षलक्षणे इन्द्रियशब्दस्य प्रवेशादिन्दियत्वं नाम किमिति जिज्ञासायामाचार्यरामप्रसादत्रिपाठिनः ''इन्द्रियमिन्द्रलिङ्गमिन्द्रसृष्टमिन्द्रः''[२] इत्यादिसूत्रानुसारेण महदहङ्कारेचेष्टाभिन्नत्वे सति प्रत्येकं जीवच्छरीरमात्मतत्त्वानुमापकत्वमिन्द्रियत्वम् '' इति इन्द्रियसामान्यलक्षणमाहुः । इन्द्रियाणि च शाब्दिकमते एकादसंसंख्याकानि सन्ति । तत्र पञ्चविधं ध्राणरसनाचक्षुःस्पर्शनश्रवणभेदाद् ज्ञानेन्द्रियम् । तथैव च पञ्चविधं वाक्पाणिपादपायूपस्थभेदात् कर्मेन्द्रियम्, उभयात्मकमिन्द्रियं मन इति सङ्कलनया एकादश इति सांख्योक्तसिद्धान्त एवास्मिन् विषये शाब्दिकानामपि बोद्ध्यम् ।

यद्यपि समवायसम्बन्धं भर्तृहरिर्न स्वीकरोति तस्याभावात् उक्तसन्निकर्षकथनं निर्मूलं स्यात् तथापि निमित्तात् कर्मयोगे'इति वार्त्तिके कौमुदीकारेण योगः सम्बन्धः संयोगसमवायात्मकः इति कथनेन समवायसंयोगावुभावपि सम्बन्धौ स्वीकृतौ । अपि च ''प्राग्दिशो विभक्तिरिति'' सूत्रे भाष्यकारोऽपि

**''स्वार्थमभिधायशब्दो निरपेक्षो द्रव्यमाह समवेतम् ।**
**समवेतस्य च वचने लिङ्गं वचनं विभक्तिं च ।।''३**

इति स्ववचनेन समवायं स्वीचकार । अतो न तत्र दोषः ।

---

१. तर्कसंग्रहप्रत्यक्षखण्डे

२. पा. सू., ५/२/९३.

३. म. भा., ५/३/१.

प्रत्यक्षप्रमाणविधाने वैयाकरणानां पद्धतिरन्यदार्शनिकेभ्यः काचिदधिका सूक्ष्मा विद्यते । तेषां मते घटादीनां प्रत्यक्षज्ञानस्य प्रक्रिया एवम्भूता वर्तते । आत्मना बुद्धिः संयुज्यते, बुद्ध्या चाहङ्कारः, अहङ्कारेण मनः, मनसा च सह चक्षुरादीन्द्रियाणि, तैश्च सह विषयः सम्बद्ध्यते तदा पञ्चमक्षणे प्रत्यक्षप्रमोपपत्तिः भवति । अयमेव क्रमः सांख्यदर्शने[१] योगदर्शने[२] च समादृतः । एतदाधारेण इन्द्रियार्थसन्निर्काजन्या या बुद्धिवृत्तिः सा तत्प्रतिबिम्बितं चैतन्यं वा प्रमा, तत्करणं प्रत्यक्षं प्रमाणमिति नागेशप्रभृतयोऽङ्गीकृतवन्तः ।[३] बौद्धजगतः सत्ता गौतमेन न्यायसूत्रे[४] ब्रह्मसूत्रे बादरायणेन जन्माद्यस्य[५] इत्यत्र स्वीकृतास्ति । इन्द्रियार्थसन्निकर्षजन्या बुद्धिवृत्तिश्च विषयाकारपरिणामरूपा इन्द्रियेण सहैव भवति । अत एव इन्द्रियगतदोषाणां सत्त्वात् पित्ताख्यदोषदुष्टरसनेन्द्रियसत्वे 'गुडःकटुरिति' रासननप्रत्यक्षं भवति । एवमेव चक्षुषोः पित्तदोषदुष्टत्वे ' पीतः शङ्ख' इति अप्रमात्मकं ज्ञान भवति । तत्र भ्रमात्मकप्रत्यक्षज्ञानवारणाय प्रत्यक्षलक्षणे इन्द्रियस्य निरूजेति विशेषणं दातव्यम् । तेन आत्मनिरूजेन्द्रियार्थमनोऽर्थसन्निकर्षजन्या बुद्धिवृत्तिः सा तत्प्रतिबिम्बितं चैतन्य वा प्रमा, तत्करणं प्रत्यक्षप्रमाणमिति स्वीक्रियते । वैयाकरणमते सन्निकर्षोऽनेकविधः । यथा घटप्रत्यक्षे स्वसंयोगसन्निकर्षः, तद्गतधर्मजातिगुणप्रत्यक्षे स्वसंयुक्तसमवायसन्निकर्षः । तद्गत-गुणनिष्ठधर्मजातिप्रत्यक्षे स्वसंयुक्त-समवेतसमवायसन्निकर्षः, घटाभाववद्भूतलमित्यत्र स्वसंयुक्तविशेषणतासन्निकर्षः भूतलानुयोगिकघटप्रतियोगिकाभावप्रत्यक्षे च स्वसंयुक्तविशेषणतासन्निकर्षो भवति । एवमेव संख्येयादौ रूपाद्यभावप्रत्यक्षे च स्वसंयुक्तसमवेतविशेषणतासन्निकर्षः, संख्यात्वव्याप्यैकत्वादौ रूपाद्यभावप्रत्यक्षे च स्वसंयुक्त-समवेतसमवेतविशेषणतासन्निकर्षो भवति । चेदत्र विशेषणतावच्छेदकधर्मेण सा विशेषणता एकैवेति स्वीक्रियते तदा सर्वासां विशेषणतानामनुगमात् सन्निकर्षाणां संख्या नाधिकाङ्गीकरणीया भवति ।

---

१. सांख्यत. कौ., ३६,३७.

२. योगसूत्र १/३६ स्वामिनारायणभाष्य ।

३. ल.मञ्जूषा बौद्धार्थनि., पृ. २९८-३०५.

४. गौतमसूत्र, ४/१/५०.

५. ब्रह्मसूत्र, १/१/२.

यद्यपि प्रत्यक्षप्रमाणविषये इन्द्रियार्थयोः सन्निकर्षस्य कारणता स्पष्टतयानुक्तत्वात् शाब्दिकमते पूर्वोक्त- प्रत्यक्षलक्षणमप्रमाणिकं प्रतिभाति तथापि ''परोक्षे लिट्'' इति सूत्रे ''वैयाकरणानां शाकटायनो रथमार्गे आसीनः शकटसार्थं यान्तं यानं नोपलेभे ।....... मनसा संयुक्तानीन्द्रियाण्युपलब्धौ कारणानि भवन्ति, मनसोऽसान्निध्यात्'' इति भाष्यस्य[१] सत्वात् पूर्वोक्तप्रत्यक्षलक्षणं प्रमाणिकं तिष्ठति । वाक्यपदीयटीकाकारो हेलाराजस्तु स्पष्टतया ''आत्मेन्द्रियार्थमनोऽर्थसन्निकर्षात् प्रत्यक्षं भवति'' इत्येवं[२] प्रत्यक्षलक्षणं शब्दत एवोक्त्वा प्रमाणयति ।

शब्दप्रत्यक्षविषये यद्यप्यन्ये दार्शनिकाः ध्वनिं शब्दं मन्यमानाः समवायः सन्निकर्ष इत्यङ्गीकुर्वन्ति। वैयाकरणास्तु स्फोटरूपं शब्दमङ्गीकुर्वन्ति । फलतः तेषां मते शब्दप्रत्यक्षे स्वसमवेतध्वनितादात्म्यं स्वसमवेतध्वनिव्यङ्ग्यत्वं सन्निकर्षो भवति । चेत् स्फोटात्मकशब्दस्य श्रावणप्रत्यक्षं नाङ्गीक्रियते तर्हि मानसप्रत्यक्षं भवति । तत्र च स्वसंयुक्तात्मतादात्म्यं, स्वसंयुक्तात्म-संयोगो वा सन्निकर्षो भवति ।

प्रत्यक्षप्रमाणमपि द्विविधं भवति, लौकिकालौकिकभेदेन । लौकिकं तूक्तमेवालौकिकप्रत्यक्षे च नैयायिकवैशेषिकौ-

**''अलौकिकस्तु व्यापारस्त्रिविविधः सम्प्रकीर्तितः ।**
**सामान्यलक्षणो ज्ञानलक्षणो योगजस्तथा ।।''**[३]

---

१. म. भा., ५/२/११५.
२. वा. प., ३/साधन स.का. १२.
३. न्या. सि. मु. कारिका ६३.

इति कारिकया सामान्यलक्षणसन्निकर्षः ज्ञानलक्षणसन्निकर्षो योगजसन्निकर्षश्चेति त्रीन् सन्निकर्षानङ्गीकृतवन्तौ । तेन सामान्यलक्षणप्रत्यासत्या धूमत्वेन सकलधूमानां ग्रहणं भवति । ज्ञानलक्षणप्रत्यासत्या च सुरभि चन्दनमित्यादौ, अत्र चक्षुः संयुक्तचन्दनस्य लौकिकं प्रत्यक्षं सौरभांशस्य चक्षुरिन्द्रियसंयुत्त्कमनः संयुक्तात्मसमवेतज्ञानरूपमलौकिकसन्निकर्षेण च प्रत्यक्षं भवति । योगजसन्निकर्षेण च योगिनः दूरदेशस्थवस्तुनो योगाभ्यसजनितधर्मविशेषात्मस्था-लौकिकसन्निकर्षेण प्रत्यक्षं भवति । वैयाकरणाः सामान्यलक्षणाप्रत्यासत्तिं च अत्वादिजात्यवच्छिन्ने शक्तिग्रहस्य पर्यवसानेनैव सर्वत्र बोधात् न स्वीकुर्वन्ति । तथैव ज्ञानलक्षणे प्रतियोगित्वानुयोगित्वनिरूपकत्वाभावेन उभयवृत्तित्वाभावात् सम्बन्धत्वमेव तस्य नास्ति । सुरभि चन्दनमित्यत्र यत्र यत्र चन्दनत्वं तत्र तत्र सुरभित्वं यथा केशरादौ इति व्याप्तेः चन्दनत्वेन सुरभित्वानुमानमेवादरणीयम् ।[१]

योगजसन्निकर्षं वैयाकरणा अपि स्वीकुर्वन्ति । योगजसम्बन्धेन तेऽपि अतीतानागत-विषयाणां प्रत्यक्षं मन्यन्ते । तत्र च योगजसम्बन्धः स्वसंयुक्तमनः संयुक्तात्मवृत्तियोगजन्य धर्मविशेषरूपः। विषयेषु तादृशधर्मवत्ता च स्वाश्रयसंयोगसम्बन्धेन विषयतासम्बन्धेन वा बोध्यते । अत्र धर्मविशेष इत्यस्य स्थाने अदृष्टविशेषोऽपि स्वीकर्तुं शक्यते । योगजप्रत्यक्षमपि युक्तयुञ्जानभेदाद् द्विविधं भवति। युक्तो योगी ईश्वरानुग्रहविशिष्टमनःप्रसादसम्पन्नो मनसा आकाशपरमाण्वाद्यखिलपदार्थगोचरं ज्ञानं सर्वदैवाधिगच्छति । युञ्जानो योगी तु कदाचित् तथा ज्ञानं लभते तस्य तु चिन्ताविशेषोऽपि सहकारी भवतीति विशेषः ।

महाभाष्यकरोऽपि योगिनां त्रिकालदर्शित्वं, सूक्ष्मदर्शित्वं-

**''विसस्य बाला इव दह्यमाना न लक्ष्यते विकृतिः सन्निपाते।**

**अस्तीति तां वेदयन्ते त्रिभावाः सूक्ष्मो हि भावोऽनुमितेन गम्य।।**[२]

---

१. लघुमञ्जूषायाम्, पृ. २१८,२१९.

२. म. भा., ३/२/१२३.

३. पा.व्या प्रमाणसमीक्षा, पृ. १-१००.

अनेन श्लोकवार्त्तिकेन स्वीकृतवान् । अत्रैव प्रदीपे उद्योते चापि ग्रन्थे योगजप्रत्यक्षमङ्गीकृतं विद्यते । आचार्यरामप्रसादत्रिपाठिचरणास्तु वैशद्येन विषयमिमन्मरूपयन् ।[3]

इयं प्रत्यक्षप्रमा कतिविधेति जिज्ञासायामुच्यते - घ्राणजरासनचाक्षुषस्पार्शनश्रवण- मानसेति भेदैः षड्विधा विद्यते । तेन षड्विधं प्रत्यक्षं सिध्यति । पुनश्चापि निर्विकल्पकसविल्पककभेदाभ्यां द्विविधं भवति । शाब्दिकाः ''अत्रा सखायः सन्तः सख्यानि जानते क्व ? य एष दुर्गो मार्गः एकगम्यो वाग्विषयः'' भाष्यं प्रदीपग्रन्थं च व्याचक्षाणो नागेशः एक एवेति इति प्रतीके ज्ञानेनैवेति प्रदीपग्रन्थस्य निर्विकल्पकज्ञानेनेत्यर्थमाह तेनाद्वैतसिद्धान्तसम्मतं ''संसर्गानवगाहि ज्ञानं'' निर्विकल्पकं प्रत्यक्षमिति लक्षणं सिध्यति । तेन घट इत्यादौ घटत्वघटयोः प्रतीतिः पूर्वं सम्बन्धविशेषरहिता निर्विकल्पिका एव भवति । एवमेव निर्विकल्पोत्तरं समुपद्यमानं शब्दस्मरणसहकृतं जातिगुणक्रियादिविषयकं वस्तुविषयकं घटोऽयं कृष्णोऽयम् इत्यादि रूपं व्यक्तविज्ञानं सविकल्पकं प्रत्यक्षं कथ्यते ।[1] न्यायशास्त्रे निष्प्रकारकमर्थात् प्रकारताशून्यं ज्ञानं निर्विकल्पकमित्युच्यते इति । एवमेव सप्रकारकमर्थात् प्रकारताख्यविषयता निरूपकज्ञानं सविकल्पकमित्युच्यते ।[2]

(२) अनुमानप्रमाणम् - अनुमानप्रमाणं वैयाकरणा अपि स्वीकुर्वन्ति । तथा च भाष्यम् -''अथवा आदेशेन सामानाधिकरण्यं दृष्ट्वाऽनुमानाद् गन्तव्यं प्रकृतेरपि सामानाधिकरण्यं भवतीति तद्यथा धूमं दृष्ट्वाऽग्निरत्रेति गम्यते, त्रिविष्टधुकं दृष्ट्वा परिव्राजक इति ।[3] व्याप्तिज्ञानजन्यं ज्ञानमनुमितिस्तत्करणमनुमानमिति नैयायिकोक्तमेवानुमानलक्षणं यद्यपि वैयाकरणा अपि स्वीकुर्वन्ति, तथापि अनुमितिविषये काचन नूतना दृष्टिः तेषां विद्यते । तद्यथा ''पर्वतो बह्निमान् धूमाद्'' इत्यत्र बह्निव्याप्यधूम इति व्याप्तिज्ञानं, बह्निव्याप्यधूमवान् पर्वत इति परामर्शः, बह्निमान् पर्वत इत्यनुमितिश्च भवति । अत्र बह्निव्याप्यधूमाकारा या अन्तःकरणवृत्तिः तत्प्रतिबिम्बनमेव धूमादिव्याप्तिज्ञानम् । तज्ज्ञानप्रयोज्यं यद् बौद्धव्यापकबाह्याकारवृत्तौ चित् प्रतिबिम्बनं, चैतन्यप्रकटनं तत्प्रतिफनम्, तदेव बह्न्यनुमितिः । तत्रापि पर्वतादिपक्षे हेतोः प्रत्यक्षत्वस्थले तस्य अपरोक्षावृत्तिः, ततो व्याप्तिरूपसम्बन्धस्य

---

१. तत्रैव

२. तर्कसंग्रहप्रत्यक्षखण्डे

३. म. भा., ५/३/१२४.

परोक्षावृत्तिः हेतोः परोक्षत्वस्थले तु द्वयोरपि परोक्षैव वृत्तिः नियतसम्बन्धविषयिणी परोक्षावृत्तिरेवानुमानं भवति । एवञ्च धूमादिलिङ्गविषयकवृत्तिः व्याप्तिरूपसम्बन्धविषयवृत्तिद्वाराहेतुर्भवति । मध्ये व्याप्तिविशिष्टस्य पक्षवृत्तित्वविषयापि वृत्तिः व्यापारत्वेन स्वीकार्या भवति । अयमेव सिद्धान्तः बौद्धपदार्थवादिनां वैयाकरणानाम् । व्याप्तिपरामर्शविषये पक्षताविषये च न्यायमतानुसारमेवैतेषां शाब्दिकानामपि-सिद्धान्तः ।

अनुमानमेतद् द्विविधं, स्वार्थनुमानपरार्थानुमानभेदात् प्रकारन्तरेण च त्रिविधं पूर्ववत्, शेषवत्, सामान्यतो दृष्टञ्चेति भेदैः । वाक्यपदीयेतु सामान्यतो दृषेटं विशेषतो दृष्टमिति अनुमानद्वयमेव स्वीकृतम् ।[1] अनुमितिरपि द्विविधा पक्षतावच्छेदकावच्छेदेन, पक्षतावच्छेदक-सामान्यधिकरण्येन च । तेन अनुमानमपि तद्दृष्ट्या द्विविधं भवति । आद्यानुमानस्योदाहरणं जगदिदं ज्ञेयं वाच्यत्वादिति केवलान्वयि हेतुस्थले, द्वितीयानुमानस्य च पर्वतो बह्निमान धूमाद् इत्येवमुदाहरणं भवति ।

अनुमानविषये महर्षिगौतमेन स्वसूत्रेण ''सव्यभिचारविरूद्धप्रकरण समसाध्य-समातीतकालाः हेत्वाभासाः'' इत्यनेन हेत्वाभासाः सूचिताः[2] आचार्यविश्वनाथपञ्चाननोऽपि स्वग्रन्थे न्यायसूत्रं व्याचक्षाणो न्यायसिद्धान्तमुक्तावल्यां प्रतिपादयति-

**''अनेकान्तो विरूद्धश्चाप्यसिद्धः प्रतिपक्षितः ।**
**कालात्ययापदिष्टश्च हेत्वाभासास्तु पञ्चधा ।।''[3] इति ।**

एते सर्वेऽपि हेत्वाभासाः शाब्दिकनयेऽपि नैयायिकातुल्या एव समाश्रिताः सन्ति ।

(३) शब्दप्रमाणम्-शब्दश्चात्र सर्वेरपि आप्तवाक्यमेव प्रमाणत्वेन स्वीक्रियते । नैयायिकाः आप्तश्च यथार्थवक्ता इत्यङ्गीकुर्वन्ति। तेन प्रयोगहेतुभूतयथार्थज्ञानजन्यशब्दत्वं शब्दप्रमाणत्वमिति

१. वा. प., २/१९०.

२. गौ. सू., १/२/४.

३. न्यायसि. मु. कारिका ७१.

४. तर्कसंग्रह शब्दखण्डे, न्यायसि. मु. शब्दखण्डे

पर्यवस्यति । शब्दप्रमाणे पदज्ञानं करणं पदार्थोपस्थितिः व्यापारः शाब्दबोधश्च फलं, तथा वृत्तिज्ञानं सहकारिकारणं भवति ।[४]

शब्दशास्त्रिणो वैयाकरणा शब्दस्य प्रामाण्यं प्राधान्येनाङ्गीकुर्वन्ति । ''वृद्धिरादैच्'' इति सूत्रे महाभाष्यकारो लिखति ''शब्दप्रमाणका वयं, यच्छब्द आह तदस्माकं प्रमाणम्[१] ऋग्वेदभाष्यभूमिकायां सायणाचार्यो वदति प्रत्यक्षानुमानाभ्यां प्रमाणाभ्यामपि यस्य ज्ञानं च भवितुमर्हति साकल्येन तस्य ज्ञानं शब्दप्रमाणेन वेदेन भवति -

**''प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**
**एवं विदन्ति वेदेन तस्माद् वेदस्य वेदता ।।''[२] इति ।**

इत्यमेव वाक्यपदीये भर्तृहरिरपि लिखति-

**''इदं पुण्यमिदं पापमित्येतस्मिन् पदद्वये ।**
**आचण्डालं मनुष्याणां समं शास्त्रप्रयोजनम् ।।''[३] इति ।**

शब्दशास्त्रे शब्दो न स्वरूपतः कारणम्, अस्माकं तथानुभवस्याभावात् । फलतः ''ह्रस्वसम्प्रत्ययादिति चेदुच्चार्यमाणः शब्दः सम्प्रत्यायको भवति न सम्प्रतीयमानः'' इति भाष्यवचनाद्[४] उच्चार्यमाण एव शब्दः शाब्दबोधे कारणं भवति । तथैव नागेशोऽपि लिखिति-''यथा घ्राणेन्द्रियगृहीतस्यैव गन्धस्य सुखादिजनकत्वं तथा च महतः पटहादि शब्दस्य कर्णपीडाजनकत्वं श्रुतस्यैव न तु स्मृतस्य, तथा पदानां बोधजनकत्वं श्रुतानामेव न यथाकथञ्चित् प्रतीयमानानामिति ।''[५] श्रुतत्वमत्र न शब्दस्येतरव्यावर्तकं विशेषणमपितूपरञ्जकमेव, अव्यभिचारात् । प्रमाणमत्र ''परोक्षे लिट्'' इति सूत्रस्थं भाष्यमेव । तद्यथा - ''परोक्ष इति धातोर्विशेषणम्, शब्दस्वरूपस्य तस्य परोक्षत्वासम्भवात्।''[६]

---

१. म. भा., १/१/१.
२. ऋ. वे. भाष्यभूमिका.
३. वा. प., १/१४०.
४. म. भा., १/१/६८.
५. लघुमन्जुषा लक्षणासकरणे
६. म. भा., ३/२/११५.

शाब्दबोधे उदयनाचार्यः ज्ञायमानं शब्दं करणं मन्यते । किन्तु मौनिश्लोकादौ पदस्यविद्यमानाच्छाब्द-बोधाभावापत्तिप्रसङ्गत् नव्यनैयायिकाः पदज्ञानं कारणं मन्यन्ते । किन्तु स्मृत्यादौ परोक्षस्थले स्फोटात्मक एव शब्दः कारणं भवति । अत एव गौरित्यत्र कः शब्द इति प्रश्ने भाष्यकारः ''येनोच्चारितेन सास्नालाङ्गलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्दः'' इत्युक्तवान् ।[१] कैयटश्च ग्रन्थमिमं व्याख्याति ''वर्णव्यतिरिक्तं पदं वाक्यं वा वाचकं भवति । वर्णानां प्रत्येकं वाचकत्वे द्वितीयादिवर्णोच्चारणमनर्थकं स्यात्, अनर्थकत्वे तूत्पत्तिपक्षे प्रत्येकं यौगपद्येनोत्पत्त्यभावोऽपि स्यात्, अभिव्यक्तिपक्षे च क्रमेणाभिव्यक्त्या समुदायाभावादेक-स्मृत्युपारूढानां वाचकत्वस्वीकारे 'सरो रस' इत्यादौ अर्थज्ञानाविशेषप्रसङ्गत् तद्भिन्नः स्फोटो नादाभिव्यङ्ग्यः शब्दो वाचकः ''इति[२] तथैव नागेशोऽपि स्वीकृतवान् ।[३] स्फुट्यते ककारादिध्वनिना अभिव्यज्यते इति कर्मव्युत्पत्त्या, स्फुटति अर्थोऽनेन इति करणव्युत्पत्त्या च स्फुटविकसने घातोः ''अकर्त्तरि च कारके संज्ञायाम्''[४] इति सूत्रेण घञ् प्रत्यये सति स्फोटशब्दो निष्पद्यते । तेन ध्वनिव्यङ्ग्यत्वे सति अर्थविषयकबोधजनकत्वं स्फोटस्य लक्षणं सिध्यति । लक्षणमेतत् स्फोटस्य तटस्थलक्षणमस्ति । स्वरूपलक्षणं तु वाक्यपदीयोक्तमनादिविधनं ब्रह्म शब्दतत्त्वं यदक्षरमित्यादिकमेवेति बोध्यम् ।[५] यच्च महाभाष्यकारः ''अथवा प्रतीतपदार्थकोलोके ध्वनिः शब्द इत्युच्यते तद्यथा-शब्दं कुरू, मा शब्दं कार्षोः, शब्दकार्ययं माणवक इति ध्वनिं कुवन्नेवमुच्यते । तस्माद् ध्वनिः शब्द''[६] इति । तत्र ध्वनिः स्फोटस्य व्यञ्जकत्वेन स्वीकृतः । अत एव तपरस्तत्कालस्येति भाष्ये ''स्फोटः शब्दः, शब्दगुणः'' इत्याह ।[७] अत्र गुणशब्दस्य व्यञ्जक इत्यर्थः । अत एव कैयटः शब्दगुण इत्यस्य ''शब्दस्य गुण उपकारो व्यञ्जकत्वेन इत्यर्थ इत्याह ।''[८१]

---

१. म. भा. पस्पशाह्निकेऽत्रैवभाष्ये ।

२. म. भा. पस्पशा. अत्रैव भाष्ये ।

३. तत्रैव उद्योते ।

४. पा. सू., ३/३/१९.

५. वा. प., १/१.

६. पस्पशाह्निके

७. म. भा., १/१/६९.

८. तत्रैव प्रदीपे

अयं ध्वन्यात्मको नादश्चतुर्विधः परा, पश्यन्ती, मध्यमा, वैखरीति भेदात् । सर्वेषां मूलाधारचक्रस्था तत्रत्यसंस्कृतवायुनाभिव्यज्यमाना स्पन्दशून्या शब्दब्रह्मरूपा अनादिनिधना परा वाणी भवति । ततो नाभिपर्यन्तमागच्छता पवनेनाभिव्यज्यमाना मनोगोचरीभूता वाक् पश्यन्ती वाणी कथ्यते । परापश्यन्तीत्युभयमपि वाग् ब्रह्म योगिनां समाधौ निर्विकल्पकसविकल्पकज्ञानविषय इत्युच्यते । ततो हृदयपर्यन्तमागच्छता तेन वायुनाभिव्यज्यमाना तत्तदर्थवाचकस्फोटाभिव्यञ्जिका स्वमात्रश्रव्या परश्रोत्राग्राह्या, सूक्ष्मा, जपादौ बुद्धिनिर्ग्राह्या या वाणी सा मध्यमेत्युच्यते । ततो मुखपर्यन्तमागच्छता वायुना मूर्धानमाहत्य परावृत्य च कण्ठताल्वादितत्तत् स्थानेष्वभिव्यज्यमाना परश्रोत्रेणापि ग्रहणयोग्या वाणी वैखरी कथ्यते ।१ इत्थमेव भर्तृहरिरत्याह-

**''वैखर्या हि कृतो नादः परश्रवणगोचरः ।**

**मध्यमया च कृतो नादः स्फोटव्यञ्जक उच्यते ।।''२**

अयं नादोऽपि ध्वनिपदवाच्यः प्राकृतवैकृतभेदेन द्विविधः । तत्र प्राकृतध्वनिः स्फोटात्मक शब्दाभिव्यञ्जने हेतुः स्वीयमात्राकालादिना नित्यमपि स्फोटं परिच्छिनत्ति । स्फोटस्याभिव्यक्त्युत्तरं द्रुतमध्यम विलम्बितवृत्तिभेदे वैकृतध्वनिहेतुर्भवति ।

इत्यमत्र स्फोटात्मकः शब्दः शाब्दबोधे कारणमस्ति । व्यापारश्च पदनिष्ठवृत्तिज्ञानजन्य पदार्थज्ञानमेव भवति । शाब्दिकमते शाब्दबोधानुकूलपदार्थज्ञानजनकज्ञानविषयपदार्थसम्बन्ध-विशेषो वृत्तिः । सा

---

१. प. ल. मञ्जूषा शक्तिप्रकरणे ।

२. प. ल. मञ्जूषा स्फोटे

च द्विविधा, शक्तिर्व्यञ्जना च । तत्र शक्तिरपि द्विविध-प्रसिद्धाप्रसिद्धभेदेन । प्रसिद्धा च शक्तिरेव, अप्रसिद्धा शक्तिश्च लक्षणा रूपैव । तेन सामान्यतया शक्तिर्लक्षणाव्यञ्जनेति भेदैर्वृत्तिस्त्रिधा भवति। अत्र शक्तिश्च वाच्यवाचकभावोऽखण्डोपाधिसम्बन्धरूपा, तद्ग्राहकञ्चेतरेहराध्यासरूपं तादात्म्यम्। लक्षणा च लक्ष्यलक्षकभावोऽखण्डोपाधिसम्बन्धरूपा, तद्ग्राहकश्च मुख्यार्थबाधादिकारणसमवधानेन शक्यतावच्छेदकधर्मारोपः । व्यञ्जना च व्यङ्ग्यव्यञ्जक-भावोऽखण्डोपाधिसम्बन्धरूपा, तद्ग्राहकश्च मुख्यार्थबाधनिरपेक्षबोधजनको मुख्यार्थसम्बन्ध-सम्बन्धसाधारणः प्रसिद्धाप्रसिद्धार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः संस्कारविशेषो विद्यते । संस्कारस्यास्य तादृशसम्बन्धबोधकत्वात् व्यञ्जनापदेन व्यवहारो विहितो नागेशेनेति बोध्यम् ।[१]

वाक्यजन्यशाब्दबोधे च शाब्दबोधसहकारिकारणानि आकाङ्क्षा योग्यता, आसत्तिः, तात्पर्यमित्योतानि सन्ति । तत्र सहकारिकारणत्वं नाम मुख्यकारणजन्यकार्यजनकत्वे सति मुख्यकारणभिन्नत्वम् । तत्र वाक्यशक्तिग्राहिका आकाङ्क्षा अथवा उत्थापकताविषयतान्यतर-सम्बन्धेन उभयसम्बन्धेन वा अर्थान्तरजिज्ञासा आकाङ्क्षा कथ्यते । आद्यस्य सम्बन्धस्य पश्य मृगो धावति इति द्वितीयस्य च 'देवदत्तस्तण्डुलं पचति' इत्यत्र क्रियाकारकयोर्द्वयोरपि मिथः तदुत्थापकत्वात् तद्विषयत्वाच्च आकाङ्क्षा भवति । परस्परान्वयप्रयोजकधर्मवत्त्वमेव योग्यता । तेन पयसा सिञ्चति इति वाक्यं योग्यम् बह्निना सिञ्चतीत्ययोग्यम् भवति । प्रकृतान्वयबोधान-नुकूलपदाऽव्यवधानमासत्तिः । तेन गिरिरग्निमान् इत्यत्रासतिरस्ति गिरिर्भूक्तमग्निमान् देवदत्तेनेत्यत्र नास्ति । एतद् वाक्यं पदं वा एतदर्थबोधायोच्चारणीयमितीश्वरेच्छा तात्पर्यम् ।[२]

---

१. प. ल. म. व्यञ्जनाप्रकरणे ।

२. तत्रैव आकाङ्क्षादिनिरूपणे ।

३. पा. सू., ६/१/१३९.

४. म. भा. वार्त्तिक, १/१/५६.

(४) अर्थापत्तिः-वैयाकरणा अर्थापत्तिमपि प्रमाणत्वेनाङ्गीकुर्वन्ति । सूत्रकारश्च स्वयमेव ''उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च''[३] इति सूत्रे वाक्यध्याहारपदं स्वीकृतवान् । वार्त्तिककारस्तु 'अचः परस्मिन् पूर्वविधौ' इति सूत्रे -

**''काममतिदिश्यतां वा सच्चासच्चापि नेह भारोऽस्ति ।**
**कल्प्यो हि वाक्यशेषो वाक्यं वक्तर्यधीनं हि ॥''[४]**

अत्रैव भाष्यकारोऽपि व्याख्याति वार्त्तिकमेतत् - ''अथवा वतिनिर्देशोऽयम् । कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुम् । तद्यथा - उशीनरवन्मद्रेषु यवाः । सन्ति न सन्ति इति । मातृवदस्य कलाः । सन्ति न सन्ति इति । एवमिहापि स्थानिवद् भवति, स्थानिवन्न भवति इति वाक्यशेषं समर्थ मिष्यामहे'' इति ।[१] एतैः सूत्रवार्त्तिकमहाभाष्यवचनैर्ज्ञायते यत् वैयाकरणमतेऽर्थापत्तिः प्रमाणत्वेन स्वीक्रियते । उपपाद्यज्ञानेनोपपादककल्पनमिति अर्थापत्तिप्रमालक्षणं भवति । अत्रार्थापत्तिप्रमायाश्चोपपाद्यज्ञानं करणम्, अस्मादुपपाद्यज्ञानजन्यः उद्बुद्धसंस्कार एव व्यापारतया स्वीक्रियते । 'पीनोऽयं देवदत्तो दिवा न भुङ्क्ते' इत्यत्र पीनत्वाद्युपपाद्ज्ञानजन्यो य उद्बुद्धसंस्कार-स्तेनोपपादकरात्रिभोजनादेः कल्पनादर्थापत्तिः प्रमा भवति । अत्र चोपपाद्यज्ञानत्वमेवार्थापत्तिप्रमाण-सामान्यलक्षणं भवति । अर्थापत्तिश्चेयं पूर्वोत्तरमीमांसासिद्धन्ते प्रमाणरूपेणप्राधान्येनाङ्गीकृता । इयञ्चार्थापत्तिः द्विविधा दृष्टार्थापत्तिः श्रुतार्थापत्तिरितिभेदात् । चक्षुरादिना यो दृष्टोऽर्थः तेनापत्तिः उपपादककल्पनमाद्या । यथा इदं रजतमिति अग्रे विद्यमानप्रतिपन्नरजतवृत्तिर्योनेदं रजतमिति निषिध्यमानत्वरूपोऽर्थः कल्पनं क्रियते । श्रुतवाक्यार्थानुपपत्त्या उपपादककल्पनमन्त्या । यथा 'शतवर्षजीविदेवदत्तो गृहे नास्ति' इति वाक्यश्रवणोत्तरं जीविनोदेवदत्तस्य गृहसत्त्वं बह्विः सत्तां विनऽनुपपन्नं सत् देवदत्तस्य बह्विः सत्त्वस्य कल्पनं क्रियते ।

---

१. म. भा., १/१/५६.

२. पाणिनिव्याकरणे प्रमाणसमीक्षा, पृ. ३०२.

एषा दृष्टार्थापत्तिरपि त्रिविधा- प्रत्यक्षपूर्विका अनुमानपूर्विका, अर्थापत्तिपूर्विका च । तेषां च मते प्रत्यक्षानुमानोपमानार्थापत्त्यनुपलब्धिरूपाणि पञ्चप्रमाणानि भवन्ति तेषां मते एषा उपमानपूर्विका, अनुपलब्धिपूर्विका चापि भवति । तेन पञ्च भेदाः एतस्य भवन्ति । शाब्दिकमते च नोपमानोपलब्ध्योः प्रमाणत्वमङ्गीकृतमतः त्रय एव भेदाः भवन्ति । आद्यभेदस्योदाहरणं तूक्तमेव । द्वितीयस्योदाहरणं देशान्तरप्राप्तिलक्षणेना-नुमानेनावगतस्यादित्यगमनस्यानुपपत्त्या ईश्वरेच्छादि-रूपकारणकल्पनम् । तृतीयभेदस्य च ''टिड्ढाणञ्ः इति सूत्रेऽनुपसर्जनाधिकारस्य व्यर्थीभूय तदन्तविधिकल्पनम् श्रुतार्थापत्तिरपि द्विविधा अभिधानानुपत्तिरभिहिता-नुपपत्तिरिति भेदात् । तत्राद्या द्वारमित्युक्ते 'पिधेहि' इत्यादिपदान्तरकल्पनारूपा, अपरा च 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यत्र अपूर्वकल्पनारूपा । यद्यपि न्यायवैशेषिकमतानुयायिनः एतस्य प्रमाणस्य खण्डनं कुर्वन्ति । तथापि पूर्वमीमांसोत्तरमीमांसानुयायिभिः तयोर्मतं निरस्यार्थापत्तिप्रमाणमङ्गीकुर्वन्ति ।[२] वैयाकरणैरपि-प्रक्रियानिर्वाहायैषा स्वीक्रियत एव । यद्यप्यर्थापत्तिविषये पुरूषोत्तमदेवः ज्ञापकं प्रत्यक्षादिलत् वस्तुबलप्रवृत्तिं प्रमाणं नास्तीति वदन् नाङ्गी करोति ।[१] तथैव परिभाषेन्दुशेखरस्थं 'ज्ञापकन्यायसिद्धानि' इति प्रतीकमादाय व्याचक्षाणः ज्ञापकमनुमानरूपमाह, यदागमपरिभाषायां चार्थापत्तिविषये मतान्तररीत्या अर्थापत्तिकथनमित्याह। तथापि तत् सर्वं प्रौढिमात्रमेवाङ्गीकरणीय-मन्यथा सर्वा भाष्योक्तंज्ञापकविषयिणी प्रक्रिया उच्छिन्ना स्यात् ।

यद्यपि वाक्यपदीयानुसारेण अभ्यासप्रतिभादृष्टप्रमाणानां चर्चा विद्यते । तथैव वेदान्तिमतेऽनुलब्धिप्रमाणस्य नैयायिकैश्चोपमानप्रमाणस्य चर्चा विहितास्ति । तथापि एतानि प्रमाणनि वैयाकरणमते यल्लक्षणं प्रमाणस्य तस्यानुसारेण तत्र प्रमाणत्वाभावात् केषाञ्चिदन्येषु प्रमाणेष्वन्तर्भावात् चत्वारि एव पूर्वोक्तप्रमाणानि प्रत्यक्षानुमानशब्दार्थापत्तिरूपाणि शाब्दिकमते तिष्ठन्तीति शम् ।

---

१. परिभा. वृ., पृ. ५७.